International Journal of Research in Social Sciences
Vol. 15 Issue 11, Nov 2025,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# संवत्सरविचार:

**विकाशसरकार:**
**शोधच्छात्र: अध्यापकश्च**
**केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली**
**Email–** bikash010397@gmail.com

**डॉ. इतिश्रीमहापात्र:**
**शोधसहमार्गदर्शिका**
**केन्द्रीयसंस्कृतविश्वविद्यालय:, नवदेहली**
**Email-** itishreeambika@gmail.com

## शोधसार:-

सकलोऽयं सृष्टिप्रपञ्चः कालस्यैव विस्तारो वर्तते। 'यः कल्पः स कल्पपूर्वः' इतिन्यायानुसारं कालोऽनादिः अनन्तश्च वर्तते। स सर्वतोभावेन परिभाषां परिमाणं चात्येति। आवैदिककालात् अद्यावधि कालो विपश्चितां मनीषिणां चिन्तनविषयो वरीवर्तीति कालस्य प्रभुता महत्ता च स्फुटायते। कालोऽमूर्तः अजः, ब्रह्म च वर्तते। पारमार्थिकीयं कालस्य सत्ता। तस्य प्रातिभासिक्याः सत्ताया दिग्दर्शनं वर्ष-कल्प-युगादिरूपे भवति। कालः स्रष्टा संहर्ता चाप्यस्ति। अयं सत्यो नित्यः, परं व्यवहारतो नश्वरः परिणामशीलश्च भवति। कालस्य विशेषरूपेषु संवत्सरः प्रधानभूतो वर्तते। अन्ये सर्वेऽपि कालविशेषा गौणा वर्तन्ते।आरुणकेतुके समाम्नातं यद् नद्य उपनद्यश्च अक्षय्यः स्यन्दन्ते। याभिः सह तासां सम्मेलनं ताः कदापि न शुष्यन्ति। तद्वत् नानाविधसमुत्थानाः कालाः संवत्सरमाश्रयन्ति।कालस्य यानि विविधरूपाणि, तानि संवत्सराख्यं कालं प्रधानरूपेण मत्वा तमेवाश्रयन्ति। वस्तुतो निमेषाद्या अयनपर्यन्ता येऽपि कालभेदाः सन्ति ते सवंत्सरादणुपदार्थाः सन्ति । अपि च, युगाद्याः परार्धपर्यन्ताः ख्याताः कालभेदास्तु संवत्सरान्महापदार्थाः। ते सर्वे तं संवत्सरं सम्यक् प्रविशन्ति।एतस्मिन् आलेखे अस्यैव संवत्सरस्य स्वरूपं प्रतिपाद्य तस्य भेदानां तथा यथाशास्त्रं संक्षेपतया निरूपणं क्रियते।

**कूटशब्दा:-** कल्पपूर्वः, किंशुकः, वराङ्गः, प्रमाथी, दुन्दुभी।

**भूमिका** – भारतवर्षे संस्कृतभाषाया भारतीयसंस्कृतेश्च रक्षणाय मुनिभिर्नानाशास्त्राणि प्रणीतानि । तेषु शास्त्रेषु वेदानुमापकतया धर्मस्य प्रमाणरूपेण धर्मशास्त्राणि विराजन्ते । सर्वत्र भारतवर्षे सुप्राचीनकालादारभ्य जनाः धर्मशास्त्रादेव स्वकर्त्तव्यानि ज्ञात्वा सम्पादयन्ति । धर्मशास्त्रं खलु कर्त्तव्यबोधकं शास्त्रम् । समग्रमानवजातेः कर्त्तव्यज्ञापकं शास्त्रं धर्मशास्त्रमित्यत्र नास्ति शङ्का । वेदानामनन्तरं वेदाङ्गानि काव्यपुराणेतिहासादीनि च प्रादुर्भूतान्यभूवन् । वेदाङ्गेषु कल्पसूत्रान्तर्गतधर्मसूत्राणि धर्मशास्त्ररूपेण परिचीयन्ते । धर्मशास्त्रमतीव प्राचीनतमं भवति। धर्मशास्त्रे कालमाश्रित्य बहु विचारः दृश्यते। आचारे कालस्यैवान्तर्भावः भवत्येव। यतो हि पञ्चमहायज्ञानां श्राद्धादिनां च व्यवस्था आचारखण्डे एव विचारिता वर्तते । पुनश्च याज्ञबल्क्यस्मृतेः व्यवहाराध्यायस्य

साधारणव्यवहारमातृकाप्रकरणे आसेधप्रसङ्गे कालशब्दस्य प्रयोगः दृश्यते[1]। तथैव प्रायश्चित्ताध्याये शुद्धिहेतवः इति प्रसङ्गे कालस्यापि दशरात्रादिकशुद्धिहेतुत्वेन परिगणितमुपलभ्यते[2] । यद्यपि व्यवहारसामान्येन कालस्य चर्चा परिलक्ष्यते तथापि पञ्चमहायज्ञेषु देवपूजायाः श्राद्धे पितृपूजायाश्चान्तर्भूतत्वात् पूजाव्रतोपवासश्राद्धदानादीनां मुहूर्ततिथि-अहोरात्र पक्षमास ऋत्वयनवर्षागत्वात् मुहूर्तादिवर्षान्तानां काले परिगणितत्वाच्च सामान्येन आचारखण्डे एव कालस्य अन्तर्भावः समीचीन इति धर्मशास्त्रमर्मज्ञानां विपश्चिद्वर्याणां सुस्पष्टमभिहितम् । अत्रोदाहरणरूपेण योगीश्वरयाज्ञबल्क्येन आचाराध्यायस्य श्राद्धप्रकरणे अमावास्यादि रूच्यन्ताः श्राद्धस्य कालाः दर्शिताः[3]। मनुरपि गृहस्थाश्रमप्रसङ्गे अमावास्यापूर्णिमादीनि पर्वाणि वर्जयित्वा गर्भधारणयोग्यशोणितदर्शनोपलक्षित काले किं स्त्रियाः गमनं विधेयमिति स्पष्टयति [4] । मनुस्मृतिटीकाकारेण कुल्लुकेनापि सप्तम्यादितिथयो दैवश्राद्धादीनां प्रकृष्टकालत्वेन निर्दिष्टाः[5] । एभिः कश्चिद् प्रमाणैः आचारैः कालस्यातीव महत्वमस्तीति स्पुटं भवति ।

काले एव कर्म अनुष्ठीयते न तु कर्मणि काल इति । धर्मशास्त्रेषु कर्मकालस्य प्राधन्यं प्रतिपाद्यते । सूर्योदयादिकमाश्रित्य एव वयं कालं गणयामः । 'कल्' धातोर्निष्पन्नोऽयं कालशब्दः । अस्यार्थो गणनं संख्याकरणं वेति । गणनावाची कलनशब्दोऽस्मादेव धातोर्निष्पन्नो वर्तते । तत्र 'कलयति आयुः इति कालः' , अर्थात् कालोऽस्माकमायुः प्रभावयति । अथवा 'कालयति सर्वाणि भूतानि इति कालः' अर्थात् कालः समस्तजीवान् विनाशयति । इत्थं 'काल' शब्दस्य द्वौ प्रमुखार्थो स्तः- समयो यमश्च । यमशब्दो मृत्युवाचकः - 'कः कालस्य न गोचरतान्तर्गतः' इति । 'कल्' धातुस्त्वनेकार्थकः- शब्दायते (भ्वादिगणे), धारयति , जानाति,गच्छति,प्रभावयति इत्यादयोऽर्थाः (चुरादिगणे) सन्ति । **" कलयति जगदेष कालोऽतः[6]"** इति वचनानुसारेण यो जगदिदं कलयति नाम धारयति स एव काल इति । तादृशोऽपि कालो येन कल्यते स कालकालो महाकालः परमेश्वरोऽनादिनिधनत्वेन च वर्ण्यते । एवं प्रकारेण केवलकालः कालकालश्चेति कालस्य द्वैविध्यं परिलक्ष्यते । तत्र केवलकालः सामान्यकालशब्देन जन्यकालत्वेन मासतिथ्यादिस्वरूपं, कालकालश्च महाकालशब्देन नित्यकालत्वेन सृष्टिस्थितिलयकारिणो विष्णोः स्वरूपञ्च बोधयति ।

जगत्यस्मिन् यो न म्रियते , सः मृत्युः वर्तते । यन्न क्षीयते स समयो वर्तते । अत एव मृत्युरपि कालः अभिधीयते, अभवितव्यं च 'अकाल ' इत्युच्यते । एवमेव श्रीकृष्णो गीतायाम् **"अहमक्षयकालोऽस्मि"** इत्युवाच । सकलोऽयं सृष्टिप्रपञ्चः कालस्येव विस्तारो वर्त्तते । '**यः कल्पः स कल्पपूर्वः**' इति न्यायानुसारं कालोऽनादिः अनन्तश्च वर्तते। कालोऽस्माकं जीवनस्य नियामकोऽप्यस्ति, सर्वव्यापकश्चापि वर्तते । निखिलमिदं विश्वं कालस्य गत्या नियमितं वर्तते। समयवाचिनः कालशब्दस्य विविधरूपाणि सन्ति । शतपत्रभेदेनकालः 'अल्पकाल' कथ्यते । ततः क्रमशः त्रुटिः, कालः काष्ठा, निमेषः, घटिका, प्रहरः, अहोरात्रम् , पक्षः,मासः, अयनम् , वत्सरः[7] इत्यादीनि कालरूपाणि भवन्ति।

---

[1]. स्थानासेधः कालकृतःप्रवासात्कर्मणस्तथा । ना. स्मृ.1-48 ।

[2]. कालोऽग्नि ......... शुद्धिहेतवः ॥ या. स्मृ. 3-31 ।

3.अमावास्याष्टका वृद्धि ........ प्रकीर्तिताः या. स्मृ 1- 217 ।

4 .ऋतुकालाभिगामि रतिकाम्यया ॥ म. स्मृ. 3-45 ।

5 . देवानुद्दिश्य यच्छ्राद्धं ........... यत्नतः ॥ म. स्मृ. ( मन्व .) 3 – 254 ।

6 का.मा. पृ-८

7 सि.शि.1/6-8

दिव्यवर्षं त्रिंशतवर्षात्मकं भवति। कृत-त्रेता-द्वापर- कलियुगान्यपि कालस्यैव रूपाणि। एवमेव सप्तदशचतुर्युगानामेकं मन्वन्तरं मन्यते। परन्तु व्यवहारिकदृष्ट्या कालस्य नैकखण्डेषु स्वीकृतेषु सत्स्वपि दार्शनिकदृष्ट्या वैज्ञानिकदृष्ट्या च कालो नित्योऽखण्डादिर्निरूपितो वर्तते - `**अनादिनिधनः कालः**[8]' । कालस्यानेके अवयवाः सन्ति। ते यथा – संवत्सरः, अयनं,ऋतुः,मासः,पक्षः,दिवसश्चेति । एतेषु कालावयवेषु संवत्सरस्य प्राधान्यात्तस्यैव संवत्सरस्यादौ विचारः क्रियते ।

## संवत्सरः-

अयनाद्यवयवयुक्तोऽवयवी कालविशेषो नाम संवत्सरः। सम्यग् वसन्ति अयनर्त्तुमासादयोऽस्मिन्निति व्युत्पतेः संवत्सरशब्दो निष्पद्यते। स च द्वादशमासात्मको भवति। द्वादशमासाः संवत्सरः इति श्रुतिर्वदति। संवत्सरस्य प्राथम्यं तस्य प्रथमं सृष्टत्वात् । माधवाचार्यः समादधान ईश्वरेण प्रथमं सृष्टत्वादिति प्रतिपादितवान्। वाजसनेयिनः आम्नातवन्तो यदीश्वरः स्वीयं द्वितीयमात्मानमैच्छत्। तस्य मनोवाग्भ्यां मैथुनेन संवत्सरस्य सृष्टिरभवत्, तस्मात्संवत्सरः प्रधानः इति । मासानां चान्द्र-सौर-सावनभेदेन त्रैविध्यात् संवत्सरस्त्रिविधः। चान्द्रसंवत्सरश्चैत्रशुक्लप्रतिपदादिः फाल्गुनदर्शान्तः। चैत्रशुक्लादिका मासा इति वचनात्। चतुःपञ्चाशदधिक-शतत्रयाहोरात्रैः सम्पन्नः। सौरस्तु मेषादिमीनान्तः। सार्द्धपञ्चषष्ठ्यधिकशतत्रयाहोरात्रैः सवितुर्द्वादशराशिभोगेन निष्पन्नः। सावनस्तु षठ्युत्तरशतत्रयाहोरात्रात्मकः। ते त्रयः संवत्सराः केषुचित्कर्त्तव्येषु व्यवतिष्ठन्ते। केषुचिद्विक-ल्प्यन्ते । तद्यथा भविष्योत्तरे [9] संवत्सरसाध्यं तिलकव्रतं पठ्यते-

**वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः।**
**शुक्ला तस्यां प्रकुर्वीत स्नानं नियमास्थितः॥**
**ललाटपट्टे तिलकं कुर्याच्चन्दनपङ्कजम्।**
**ततः प्रभृत्यनुदिनं तिलकालंकृतं मुखम्॥**
**धार्यं संवत्सरं यावत् शशिनैव नभस्तलम्॥**

इति। तत्र संवत्सरश्चान्द्रोऽवगन्तव्यः। शुक्लपक्षप्रतिपत्तिथिस्तल्लिङ्गात्। नहि शुक्लाः कृष्णपक्षे प्रतिपदादितिथयश्च सौरसावनमानोपजीवनेन प्रवृत्ताः। यत्तु नववर्षाणि पञ्च चेत्यादौ संवत्सरस्यानन्तव्रते संख्या स्मर्यते। तत्रापि चान्द्र एव संवत्सरः। शुक्लपक्षे चतुर्दश्यामित्यादिलिङ्गात् न च चैत्रशुक्लप्रतिपदि उपक्रमाभावादचान्द्रत्वमिति वाच्यं तदुपक्रमस्य संवत्सरस्य स्मृतिसिद्धत्वात्।

स च संवत्सरः पुनः माधवाचार्यमते पञ्चविधः। सौरः,चान्द्रः,सावनः,नाक्षत्रः,बार्हस्पत्यश्चेति। हेमाद्रिमते च त्रिविधः,द्वयोश्चान्द्रनाक्षत्रिकयोर्धर्मशास्त्रेऽनुपयोगात्। तत्र मेषसंक्रमणात् पुनः मेषसंक्रमणावधि यः संवत्सरः स सौरः। चैत्रशुक्लप्रतिपदः आरभ्य फाल्गुनामावास्यां यावत् यः संवत्सरः स चान्द्रः। षट्युत्तरत्रिशताहोरात्रैः सम्पन्नः संवत्सरः सावनः। सप्तविंशतिनक्षत्राणां द्वादशमासावधिभोगकालः नाक्षत्रः। बृहस्पतेरेकस्माद्राशेः राश्यन्तरःप्रति गमनकाल एको बार्हस्पत्यसंवत्सरः। एतेषां सावनमान गणनया सौरसंवत्सरः पञ्चषष्ट्युत्तरत्रिंशतदिवसात्मकः।

[8] वि.ध.पु.1/7/2
[9] .का.मा.पृ-37

International Journal of Research in Social Sciences
**Vol. 15 Issue 11, Nov 2025,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

चान्द्रसंवत्सरः चतुःपञ्चाशताधिकत्रिंशतदिवसात्मकः। सावनस्तु षष्ट्युत्तरत्रिंशतदिवसात्मकः नक्षत्रसंवत्सरः चतुर्विंशत्यधिकत्रिंशतदिनात्मकः । बार्हस्पत्यश्च एकषष्ट्युत्तरत्रिंशतदिवसात्मकः । एते च सौर-बार्हस्पत्य- सावन - चान्द्र-नाक्षत्रसंवत्सराः क्रमेण मातुल-पाताल-अतुल-विमल-वराङ्गादिशब्दैर्व्यपदिश्यन्ते । यथोक्तं कालमाधवे[10] -

**सौर-बृहस्पति-सावन-चान्द्रिक-नाक्षत्रिकाः क्रमेण स्युः ।**
**मातुल-पातालातुल-विमल-वराङ्गाश्च वत्सरा पञ्चेति ।।**

गणकप्रसिद्ध्याऽक्षरसंख्यया च मातुलशब्दःपञ्चषष्ट्यधिकशतत्रयमाचष्टे । अतस्तावद्दिवसपरिमितः सौरसंवत्सरः। पातालशब्दः एकषष्ट्यधिकशतत्रयमाचष्टे । अतस्तावद्दिवसपरिमितः सौरसंवत्सरः । पातालशब्दः एकषष्ट्यधिक-शतत्रयमाचष्टे । अतस्तावद्दिवसपरिमितो बार्हस्पत्यसंवत्सरः । अतुलशब्दः षष्ट्यधिकशतत्रयमाचष्टे । अतस्तावद्दिवसपरिमितः सावनसंवत्सरः । विमलशब्दः चतुःपञ्चाशदधिक शतत्रयमाचष्टे । अतस्तावद्दिवसपरिमितः चान्द्रसंवत्सरः । वराङ्गशब्दःचतुर्विंशत्यधिकशतत्रयमाचष्टे । अतस्तस्तावद्दिवसपरिमितः नाक्षत्रसंवत्सरः । पुनश्च चान्द्रसंवत्सरः षष्ठिभेदः । ते च संवत्सराः क्रमशः अनुवर्त्तन्ते ।अर्थात् एकषष्टितमः संवत्सरः पुनः प्रथमसंवत्सरो भवति । ते च गार्ग्यवचनत्वेन निर्णयसिन्धौ प्रदर्शिताः । तद्यथा[11] –

**प्रभवो विभवः शुक्लः प्रमथोऽथ प्रजापतिः ।**
**अङ्गिरा श्रीमुखो भावो युवाधाता तथैव च ।।**
**ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।**
**चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ।।**
**सर्वजित् सर्वधारी च विरोधी विकृतिः खरः ।**
**नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ।।**
**हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः ।**
**शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ।।**
**प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत् ।**
**परिधावी प्रमादी च आनन्दो रक्षसोऽनलः ।।**
**पिङ्गलः कालयुक्तश्च सिद्धर्थी रौद्रदुर्मती ।**
**दुन्दुभी रूधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ।।**

अस्यैव चान्द्रसंवत्सरस्य पञ्च अवान्तरभेदाः अपि वर्त्तन्ते । ते यथा-संवत्सरः,परिवत्सरः, इदावत्सरः,अनुवत्सरः,इद्वत्सरश्चेति । एतेषां वत्सराणां अधिष्ठातृदेवता अपि चातुर्मास्यब्राह्मणग्रन्थे वर्णिताः । संवत्सरस्याधिष्ठातृदेवता अग्निः, परिवत्सरस्याऽऽदित्यः,इदावत्सरस्य चन्द्रमा,अनुवत्सरस्य वायुः,इद्वत्सरस्य महेश्वर इति । एतेषां पञ्चानां सङ्घः युगसंज्ञया कथ्यते । प्रसङ्गेऽस्मिन् ब्रह्मवैवर्त्तपुराणवचनमुत्थाय माधवाचार्यः कालमाधवे प्रत्यपादयत् यत्[12] –

[10] .का.मा.पृ-33
[11] . नि.सि.- पृ-6
[12] .का.मा. – पृ-35

**संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।**
**इदावत्सरस्तृतीयश्चतुर्थश्चानुवत्सरः ।।**
**इद्वत्सरः पञ्चमस्तु तत्सङ्गो युगसंज्ञकः ।।**

एतेषां संवत्सराणामुपयोगविषये विष्णुधर्मोत्तरपुराणे प्रमाणं विद्यते । तत्संगृह्य कालमाधवे उक्तं यत् -संवत्सरे तिलदानं,परिवत्सरे यवदानं,इदावत्सरे यवदानं,इदावत्सरे वस्त्रदानं,अनुवत्सरे धान्यदानं ,इद्वत्सरे च रजतदानं महाफलदायकं भवति । यथोक्तं तत्र[13] –

**संवत्सरे तु दातॄणां तिलदानं महाफलम् ।**
**परिपूर्वे तथा दानं यवानां द्विजसतम् ।।**
**इदापूर्वे तु वस्त्राणां धान्यानां चानुपूर्वके ।**
**इत्पूर्वे रजतस्यापि दानं चोक्तं महाफलम् ।।**

एतेषां वत्सराणां मध्ये तत्तदधिष्ठातृदेवतानां पूजारूपो व्रतविशेषोऽपि तत्रैव प्रतिपादितोऽस्ति। तासां वह्न्यादिदेवतानां मण्डलविन्यासं कृत्वा तदुपरिपूजनहोमादिकश्च यथाविधि करणीयमिति कालमाधवे प्रतिपादितम् । तद्यथापूजनहोमादिकश्च यथाविधि करणीयमिति कालमाधवे प्रतिपादितम् तद्यथा[14] –

**संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः ।**
**इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः ।।**
**इत्पूर्वश्च तथा प्रोक्तो देवदेवो महेश्वरः ।**
**तेषां मण्डलविन्यासं प्राग्वदेव विधीयते ।।**
**प्राग्वत् स्यात् पूजनं कार्यं होमः कार्यो यथाविधि ।**

एवं प्रकारेण एकस्मिन् वर्षपञ्चके एकैकक्रमेण संवत्सरादयो भवन्ति । संवत्सरेषु निर्दिष्टदेव्रतानां पूजारूपिणां विशेषव्रतानां चर्चाऽपि पुराणे आयाति।

**उपसंहारः-** संवत्सराणामावृत्त्या निष्पादितत्वात् महतां पदार्थानामप्यध्यक्षः संवत्सर एव। अतस्तेऽपि संवत्सरमेव प्रविशन्ति। वेदाङ्गज्योतिषे युगाध्यक्षः प्रजापतिः संवत्सरमय उक्तः। दिनतर्त्वयनमासास्तस्य संवत्सरस्याङ्गभूताः।

**पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।**
**दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचि[15]।।**

सच संवत्सरस्तैरणुभिर्महद्भिश्च सर्वैः पदार्थैः समाविष्टोऽतिदीर्घः सन्नस्मिन् संसारे नोच्छिद्यते।

[13]. का.मा. – पृ-35
[14]. का.मा. – पृ-36
[15] वे. ज्यो., श्लो. 1

International Journal of Research in Social Sciences
Vol. 15 Issue 11, Nov 2025,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**सन्दर्भग्रन्थसूची –**

1. कालमाधवः – चौखाम्भा संस्कृत सिरीज , वाराणसी ।
2. महाभाष्यम् – चौखाम्भा संस्कृत सिरीज , वाराणसी ।
3. निर्णयसिन्धुः – निर्णयसागर , बम्बाई ।
4. ब्रह्मपुराण – नागरी प्रचारिणी सभा , वाराणसी ।
5. ब्रह्माण्डपुराण – मोतिलाल बनारसी दास , दिल्ली ।
6. कृत्यरत्नाकर - एसियाटिक सोसायिटी , कलिकाता ।
7. बौधायन धर्मसूत्र - चौखाम्भा संस्कृत सिरीज , वाराणसी ।
8. श्रीमद्भगवतगीता – गीताप्रेस, गोरखपुर ।
9. विष्णुधर्मोत्तरपुराणम् – नाग पब्लिशर्स, नई दिल्ली -1985